त्रिष्टौ मासि मघाख्ये कुजशनिदिवसे जन्मताराञ्च चाथ । नाडीनक्षत्रहीने गुरुरविरजनीनाथताराविशुद्धौ प्रातः कार्य्या परीक्षा द्वितनुचरग्रहांशोदये शस्तलग्ने” । इति । यद्यपि दिव्ये वारविशेषविधानाभावस्तथापि शिष्टाचारादादित्यवारे दिव्यानि दातव्यानीति मिताक्षरायाम् । अथ दिव्यदेशाः तत्र पितामहः । “प्राङ्मुखो निश्चलः कार्य्यः शुचौ देशे धटः सदा । इन्द्रस्थाने सभायां वा राजद्वारे चतुष्पथे” इति । धटग्रहणं दिव्यान्तरस्याप्युपलक्षणम् । इन्द्रस्थानग्रहणञ्च प्रसिद्धदेवतायतनान्तरस्याप्युपलक्षणम् । अतएव दिव्यमात्रमुपक्रम्य नारदः “सभाराजकुलद्वारे देवायतनचत्वरे” । विषयविशेषे इन्द्रस्थानादीनां व्यवस्थामाह । कात्यायनः “इन्द्रस्थानेऽभिशस्तानां महापातकिनां नृणाम् । नृपद्रोहप्रवृत्तानां राजद्वारे प्रयोजयेत् । प्रातिलोम्यप्रसूतानां दिव्यं देयञ्चतुष्पथे । अतोऽन्येषु तु कार्य्येषु सभामध्ये विदुर्बुधा” इति । इन्द्रस्थाने इन्द्रध्वजपूर्वस्थाने । दिव्यदेशानादरे दिव्यं विसंवदतीत्याह, नारदः “अदेशकालदत्तानि बहिर्वासकृतानि च । व्यभिचारं सदर्थेषु कुर्वन्तीह न संशयः” । वासो जननिवासस्तस्माद्बहिष्कृतानि निर्जनप्रदेशकृतानीति यावत् । अतएव पितामहः “प्रत्यक्षं दापयेद्दिव्यं राजा वाधिकृतोऽपि वा । ब्राह्मणानां श्रुतवतां प्रकृतीनां तथैव चेति” । ब्राह्मणानां प्रकृतयोऽमात्यास्तेषाञ्चेत्यन्वयः ।

अथ दिव्यसाधारणविधिस्तत्र बृहस्पतिः “स्नेहात् क्रोधाल्लोभतो वा भेदमायान्ति साक्षिणः । विधिदत्तस्य दिव्यस्य न भेदो जायते क्वचिदिति” । विधिश्च पितामहेन दर्शितः “दिव्येषु सर्वकार्य्याणि प्राड्विवाकः समाचरेत् । अध्वरेषु यथाध्वर्युः सोपवासो नृपाज्ञया । तत्र आवाहयेद्देवान् विधिनानेन धर्म्मवित् । वादित्रतूर्य्यघोषैश्च गन्धमाल्यानुलेपनैः । प्राङ्मुखः प्राञ्जलिर्भूत्वा प्राड्विवाकस्ततो वदेत् । एह्येहि भगवन्धर्म्म ! अस्मिन्दिव्ये समाविश । सहितो लोकपालैश्च वस्वादित्यमरुद्गणैः । आवाह्य तु धटे धर्म्मं पश्चादङ्गानि विन्यसेत्” । सर्वकार्य्याणि साधारणानि असाधारणानि च ततस्तदुपयोगिसामग्रीसम्पादनानन्तरमित्यर्थः । धटग्रहणमत्र दिव्यमात्रोपलक्षणम् । अस्मिन्दिव्य इति मन्त्रलिङ्गादेतेषां धर्म्माणां दिव्यमात्रसाधारण्यम् । “इमं मन्त्रविधिं कृत्स्नं सर्वदिव्येषु योजयेत् । आवाहनञ्च देवानां तथैव परिकल्पयेत्” इत्युपसंहरता तेनैवोक्तत्वाच्च । अङ्गानि कानीत्याकाङ्क्षायां स एवाह, “इन्द्रं पूर्वे तु विन्यस्य प्रेतेशं दक्षिणे तथा । वरुणं पश्चिमे भागे कुवेरं चोत्तरे तथा । अग्न्यादिलोकपालांश्च कोणभागेषु विन्यसेत् । इन्द्रः पीतो यमः श्यामो वरुणः स्फटिकप्रभः । कुवेरस्तु सुवर्णाभः अग्निश्चैव सुवर्णभः । तथैव निरृतिः श्यामो वायुर्धूम्रः प्रशस्यते । ईशानस्तु भवेद्रक्त एवं ध्यायेत्क्रमादिमान् । इन्द्रस्य दक्षिणे पार्श्वे वसूनास्थापयेद्बुधः । धरो ध्रुवस्तथा सोम आपश्चैवानलोऽनिलः । प्रत्यूषश्च प्रभातश्च वसवोऽष्टौ प्रकीर्त्तिताः ! देवेशेशानयोर्मध्ये आदित्यानां तथाऽयनम् । धातार्य्यमा च मित्रश्च वरुणांशो भगस्तथा । इन्द्रो विवस्वान् पूषा च पर्जन्यो दशमः स्मृतः । ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः । इत्येते द्वादशादित्या नामभिः परिकीर्त्तिताः । अग्नेः पश्चिमभागे तु रुद्रा एकादश स्मृताः । वीरभद्रश्च शम्भुश्च गिरिशश्च महायशाः । अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः । भुवनाधीश्वरश्चैव कपाली च विशाम्पतिः । स्थाणुर्भवश्च भगवान् रुद्रास्त्वेकादश स्मृताः । प्रेतेशरक्षोमध्ये च मातृस्थानं प्रकल्पयेत् । ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा । वाराही चैव माहेन्द्री चामुण्डा गणसंयुता । निरृतेरुत्तरे भागे गणेशायतनं विदुः । वरुणस्योत्तरे भागे मरुतां स्थानमुच्यते । पवनः स्पर्शनो वायुरनिलो मरुतस्तथा । प्राणः प्राणेशजीवौ च मरुतोऽष्टौ प्रकीर्त्तिताः । धटस्योत्तरभागे तु दुर्गामावाहयेद्बुधः । एतासां देवतानान्तु स्वनाम्ना पूजनं विदुः । भूषावसानं धर्म्माय दत्त्वाचार्घादिकं क्रमात् । अर्घादि पश्चादङ्गानां भूषान्तमुपकल्पयेत् । गन्धादिकां निवेद्यान्तां परिचर्य्यां प्रकल्पयेत् । चतुर्दिक्षु तथा होमः कर्त्तव्यो वेदपारगैः । आज्येन हविषा चैव समिद्भिर्होमसाधनैः । सावित्र्या प्रणवेनाथ स्वाहान्तेनैव होमयेत्” । अङ्गानाम् इन्द्रादिदुर्गान्तानाम् अर्घाद्युपकल्पनञ्च न काण्डानुसमयेन । तथात्वे प्रयोगवचनावगताङ्गसहभावबाधापत्तेः । किन्तु पदार्थानुसमयेन तथा च दुर्गायै भूषणं दत्त्वा धर्म्मस्येन्द्रादिदुर्गान्तानाञ्च गन्धादिपरिचर्य्यं विप्रकल्पयेदिति । गायत्रीं प्रणवादिकामुच्चार्य्य पुनः प्रणवं स्वाहाकारान्तमुच्चार्य्य समिदाज्यचरुभिः प्रत्येकमष्टोत्तरशतं जुहुयात् ।